श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# श्रीमद्भागवत रसिक कुटुंब

## UG-11.12- द्वितीय सोपान



स्व धाम प्रस्थान को देखो हो रहे श्री कृष्ण तैयार।
उद्धृत किए उद्धव समक्ष अद्भुत अनमोल उद्गार।।

नारायणं(न्) नमस्कृत्य, नरं(ञ्) चैव नरोत्तमम्।
देवीं(म्) सरस्वतीं(वँ) व्यासं(न्), ततो जयमुदीरयेत्॥

नामसङ्कीर्तनं(यँ) यस्य, सर्वपापप्रणाशनम्।
प्रणामो दुःखशमनस्, तं(न्) नमामि हरिं(म्) परम्॥

श्रीमद्भागवतमहापुराणम्

एकादशः स्कन्धः

॥ अथ द्वादशोऽध्यायः ॥

### श्रीभगवानुवाच

न रोधयति मां(यँ) योगो, न सां(ङ्)ख्यं(न्) धर्म एव च ।
न स्वाध्यायस्तपस्त्यागो, नेष्टापूर्तं(न्) न दक्षिणा ॥ 1॥

स्वाध्या+ यस्तपस्+ त्यागो

व्रतानि यज्ञश्छान्दां(म्)सि, तीर्थानि नियमा यमाः ।
यथावरुन्धे सत्सं(ङ्)गः(स्), सर्वसं(ङ्)गापहो हि माम् ॥ 2॥

यज्ञश्+ छान्दां(व्)सि, यथा+ वरुन्धे ,सर्व+ सं(ङ्)गापहो

सत्सं(ङ्)गेन हि दैतेया, यातुधाना मृगाः(ख्) खगाः ।
गन्धर्वाप्सरसो नागाः(स्), सिद्धाश्चारणगुह्यकाः ॥ 3॥

गन्धर्वाप्+ सरसो, सिद्धाश्+ चारण+ गुह्यकाः

**विद्याधरा मनुष्येषु , वैश्याः(श्) शूद्राः(स्) स्त्रियोऽन्त्यजाः ।**

**रजस्तमः(फ्) प्रकृतयस्- तस्मिं(म्)स्तस्मिन् युगेऽनघ ॥ 4॥**

स्त्रियोऽन्+ त्यजाः, तस्मिं(व्)स्+ तस्मिन्

**बहवो मत्पदं(म्) प्राप्तास्- त्वाष्ट्रकायाधवादयः ।**

**वृषपर्वा बलिर्बाणो, मयश्चाथ विभीषणः ॥ 5॥**

त्वाष्ट्र+ काया+ धवादयः

**सुग्रीवो हनुमानृक्षो, गजो गृध्रो वणिक्पथः ।**

**व्याधः(ख्) कुब्जा व्रजे गोप्यो, यज्ञपत्न्यस्तथापरे ॥ 6॥**

यज्ञ+ पत्न्यस्+ तथापरे

**ते नाधीतश्रुतिगणा, नोपासितमहत्तमाः ।**

**अव्रतातप्ततपसः(स्), सत्सं(ङ्)गान्मामुपागताः ॥ 7॥**

नाधी+तश्रुतिगणा, नोपा+ सित+ महत्तमाः,

अव्रता+ तप्त+ तपसः(स्), सत्सं(ङ्)गान्+ मामुपा+ गताः

**केवलेन हि भावेन, गोप्यो गावो नगा मृगाः ।**

**येऽन्ये मूढधियो नागाः(स्), सिद्धा मामीयुरञ्जसा ॥ 8॥**

मामी+ युरञ्जसा

**यं(न्) न योगेन सां(ङ्)ख्येन, दानव्रततपोऽध्वरैः ।**

**व्याख्यास्वाध्यायसं(न्)न्यासैः(फ्), प्राप्नुयाद् यत्नवानपि ॥ 9॥**

व्याख्यास्+ वाध्याय+ सं(न्)न्यासैः(फ्)

**रामेण सार्धं(म्) मथुरां(म्) प्रणीते,**

**श्वाफल्किना मय्यनुरक्तचित्ताः ।**

**विगाढभावेन न मे वियोग-**

**तीव्राधयोऽन्यं(न्) ददृशुः(स्) सुखाय ॥ 10॥**

श्वा+ फल्किना, मय्यनु+ रक्तचित्ताः, तीव्रा+ धयोऽन्यं(न्)

तास्ताः क्षपाः(फ्) प्रेष्ठतमेन नीता,

मयैव *वृन्दावनगोचरेण ।

क्षणार्धवत्ताः(फ्) पुनरं(ङ्)ग तासां(म्),

हीना मया *कल्पसमा बभूवुः ॥ 11॥

वृन्दा+ वन+ गोचरेण, क्षणार्ध+ वत्ताः(फ्)

ता नाविदन् मय्यनुषं(ङ्)ग*बद्ध-

धियः(स्) स्वमात्मानम*दस्तथेदम् ।

यथा समाधौ मुनयोऽब्धितोये,

*नद्यः(फ्) प्र*विष्टा इव नामरूपे ॥ 12॥

मय्य+ नुषं(ङ्)ग+ बद्ध ,

स्वमात्मा+ नमदस्+ तथेदम् , मुनयोऽब्+ धितोये

*मत्कामा रमणं(ञ्) जार- *मस्वरूपविदोऽबलाः ।

ब्रह्म मां(म्) परमं(म्) प्रापुः(स्), सं(ङ्)गाच्छतस*हस्रशः ॥ 13॥

मस्वरूप+ विदोऽबलाः ,

सं(ङ्)गाच्छत+ सहस्रशः

*तस्मात्त्व*मुद्धवो*त्सृज्य, चोदनां(म्) प्रतिचोदनाम् ।

प्रवृत्तं(ञ्) च निवृत्तं(ञ्) *च, श्रो*तव्यं(म्) श्रुतमेव च ॥ 14॥

तस्मात्+ त्वमुद्+ धवोत्+ सृज्य

मामेकमेव शरण- मात्मानं(म्) सर्वदेहिनाम् ।

याहि सर्वात्मभावेन, मया स्या ह्यकुतोभयः ॥ 15॥

सर्वात्+ मभावेन

*उद्धव उवाच

संशयः(श्) *शृण्वतो वाचं(न्), तव योगेश्वरेश्वर ।

न निवर्तत आत्*मस्थो, ये*न भ्राम्यति मे मनः ॥ 16॥

**श्रीभगवानुवाच**

**स एष जीवो विवरप्रसूतिः(फ्),**

**प्राणेन घोषेण गुहां(म्) प्रविष्टः ।**

**मनोमयं(म्) सूक्ष्ममुपेत्य रूपं(म्),**

**मात्रा स्वरो वर्ण इति स्थविष्ठः ॥ 17॥**

विव+ रप्रसूतिः(फ्), सूक्ष्+ ममुपेत्य

**यथानलः(ख्) खेऽनिलबन्धुरूष्मा,**

**बलेन दारुण्यधिमथ्यमानः ।**

**अणुः(फ्) प्रजातो हविषा समिध्यते,**

**तथैव मे व्यक्तिरियं(म्) हि वाणी ॥ 18॥**

खेऽ+ निलबन्धु+ रूष्मा , दारुण्+ यधिमथ्+ यमानः

**एवं(ङ्) गदिः(ख्) कर्म गतिर्विसर्गो,**

**घ्राणो रसो दृक् स्पर्शः(श्) श्रुतिश्च ।**

**सङ्कल्पविज्ञानमथाभिमानः(स्),**

**सूत्रं(म्) रजः(स्)सत्त्वतमोविकारः ॥ 19॥**

गतिर्+ विसर्गो , सङ्कल्प+ विज्ञान+ मथाभिमानः(स्) ,सत्त्व+ तमो+ विकारः

**अयं(म्) हि जीवस्त्रिवृदब्जयोनि-**

**रव्यक्त एको वयसा स आद्यः ।**

**विश्लिष्टशक्तिर्बहुधेव भाति,**

**बीजानि योनिं(म्) प्रतिपद्य यद्वत् ॥ 20॥**

जीवस्+ त्रिवृदब्+ जयोनि , विश्लिष्ट+ शक्तिर्+ बहुधेव

**यस्मिन्निदं(म्) प्रोतमशेषमोतं(म्),**

**पटो यथा तन्तुवितानसं(व्)स्थः ।**

**य एष सं(म्)सारतरुः(फ्) पुराणः(ख्),**

**कर्मात्मकः(फ्) पुष्पफले प्रसूते ॥ 21॥**

प्रोत+ मशेष+ मोतं(म्) , तन्तु+ वितान+ सं(व्)स्थः

**द्वे अस्य बीजे शतमूलस्त्रिनालः(फ्),**

**पं(ञ्)चस्कन्धः(फ्) पं(ञ्)चरसप्रसूतिः ।**

**दशैकशाखो द्विसुपर्णनीडस्-**

**त्रिवल्कलो द्विफलोऽर्कं(म्) प्रविष्टः ॥ 22॥**

शतमूलस्+ त्रिनालः(फ्) , पं(ञ्)चरस+ प्रसूतिः , द्विसुपर्ण+ नीड

**अदन्ति चैकं(म्) फलमस्य गृध्रा,**

**ग्रामेचरा एकमरण्यवासाः ।**

**हं(म्)सा य एकं(म्) बहुरूपमिज्यैर्-**

**मायामयं(वँ) वेद स वेद वेदम् ॥ 23॥**

एक+ मरण्य+ वासाः, बहुरू+ पमिज्यैर्

**एवं(ङ्) गुरूपासनयैकभक्त्या,**

**विद्याकुठारेण शितेन धीरः।**

**विवृश्च्य जीवाशयमप्रमत्तः(स्),**

**सम्पद्य चात्मानमथ त्यजास्त्रम् ॥ 24॥**

गुरूपा+ सनयै+ कभक्त्या ,जीवा+ शयम+ प्रमत्तः(स्) ,चात्मा+ नमथ

**इति श्रीमद्भागवते महापुराणे पारमहंस्यां**

**संहितायामेकादशस्कन्धे द्वादशोऽध्यायः ॥**

**ॐ पूर्णमदः(फ्) पूर्णमिदं(म्)पूर्णात्पूर्णमुदच्यते**

**पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते।।**

**ॐ शान्तिः(श्)शान्तिः(श्)शान्तिः।।**

